हेमच० पद्मस्य वासः सौरभम् ६त० । २कमलसौरभे पु०।

**पद्मवृक्ष** पु० पद्मतुल्यो वृक्षः । पद्मकाष्ठे राजनि० ।

**पद्म(वी)वीज** न० ६त० । कमलवी(बी)जे पद्माक्षे राजनि० "पद्म(वी)वीजं हिमं स्वादु कषायं तिक्तकं गुरु । विष्टम्भि वृष्यं रूक्षञ्च गर्भसंस्थापकं परम्" भावप्र० ।

**पद्मवो(वी)जाभ** न० पद्मवी(वी)जमिवाभाति आ+भा—क । (माखना) ख्याते मखान्ने राजनि० ।

**पद्मा** स्त्री पद्मनाधारत्वेनास्त्यस्याः अच् । १लक्ष्म्यां २लवङ्गे ३पद्मचारिण्यां लतायां च अमरः । ४मनसादेव्यां पद्मन्यां ५फञ्जिकावृक्षे च मेदि० ६अर्हन्मातृभेदे हेमच० ७कुसुम्भपुष्पे रत्नमाला । ८वृहद्रथराजदुहितरि दशकल्किदेवपत्न्याञ्च कल्किपु० ।

**पद्माकर** पु० ६त०। १जलाशयमात्रे अमरः सपद्मेऽगाधजलाशये २तद्योग्ये निम्नस्थे तदर्थे जलाशयोत्सर्गशब्दे दर्शिते ३तडागरूपे जलाधारे च ।

**पद्माक्ष** न० पद्मस्याक्षीव पचसमा० । १पद्मवी(बी)जे हारा० "पद्माक्षैर्निर्मिता माला शत्रूणां नाशिनी मता" तन्त्रसारः । पद्ममिवाक्षि यस्य षच्समा० । २पद्मतुल्यनेत्रे त्रि० स्त्रियां षित्त्वात् ङीष् ॥

**पद्माट** पु० पद्ममिवाटति अट—अच् । चक्रमर्दवृक्षे (दादमर्दन) राजनि० । [अमरः ६त०। २पद्मानां स्थाने पु० ।

**पद्मालया** स्त्री पद्ममालयो यस्याः । १लक्ष्म्यां २लवङ्गे च

**पद्मावती** पु०पद्म+अस्त्यर्थे मतुप् मस्य वः संज्ञायां दीर्घश्च । (पद्मा) १नदीभेदे २मनसादेव्यां शब्दच० ३पद्मचारिणीलतायां जटाध०। ४कुमारानुचरमातृभेदे भा०श०४७अ०। ५शृगालवत्पमहिषीभेदे हरिवं० १०१अ०। असंज्ञायां तु न दीर्घः । पद्मवत् पद्मयुक्ते त्रि० स्त्रियां ङीप् ।

**पद्मावतीप्रिय** पु० ६त० । १जरत्कारुमुनौ २कल्किदेवे ३शृगालरूपे च त्रि०

**पद्मासन** "ऊरुमूले वामपादं पुनस्तु दक्षिणं पदम् । वामोरौ स्थापयित्वा तु पद्मासनमिति स्मृतम्" जामलोक्ते आसनभेदे अस्यैव प्रकारभेदः तन्त्रसारे योगाङ्गतया उक्तः तच्च ८८६पृ० दर्शितम् एवमन्यदपि तल्लक्षणं योगाङ्गतया ध्येयं बद्धपद्मासनमहापद्मासनेति च तस्यैव प्रकारभेदः । देवपूजार्थे पद्माकारे २आसनभेदे पद्ममासनं यस्य । ३कमलासने ब्रह्मणि पु० ।

**पद्माह्वा** स्त्री पद्मं तद्गन्धमाह्वयते स्पर्द्धते स्वगन्धेन आ+ह्वे—क । १पद्मचारिण्यां लतायां राजनि० २लवङ्गे न०

**पद्मिनी** स्त्री पद्मं विद्यतेऽस्याः पुष्करा० इनि अभिधानात् स्त्रीत्वम् । १पद्मयुक्तदेशे २पद्मधारिणि विष्णौ पु० "पद्मी पद्मनिभेक्षणः" विष्णुसं० तस्य शङ्खचक्रगदापद्मधारित्वात् तथात्वम् । ३पद्मधारिमात्रे त्रि०स्त्रियां ङीप्। ४हस्तिनि पु० अमरः पद्मानां समूहः इनि । ६पद्मसमूहे ७पद्मलतायाञ्च अमरः "मृणालदलोत्फुल्लफलैः सा लतिका पुनः । पद्मिनीत्युच्यते प्राज्ञैर्बिसिन्यादिश्च सा स्मृता । पद्मिनी मधुरा तिक्ता कषाया शिशिरा सरा । पित्तकृमिशोषवान्तिभ्रान्तिसन्तापदोषहृत्" राजनि० "भवति कमलनेत्रा नासिकाक्षुद्ररन्ध्रा अविरलकुचयुग्मा दीर्घकेशी कृशाङ्गी । मृदुचरणसुशीला गीतनृत्यानुरक्ता सकलतनुसुवेशा पद्मिनी पद्मगन्धा" रतिमञ्जर्युक्तलक्षणयुक्ते ८स्त्रीभेदे "पद्मिनी शशके तुष्टा" इति च तन्त्रोक्तम् । १०सरोवरे ११पद्मे च विश्वः १२मृणाले शब्दमाला ।

**पद्मिनीकण्टक** पु० कमलिन्याः कण्टकाकारे सुश्रुतोक्ते क्षुद्ररोगभेदे २२८२ पृ० दृश्यम् ।

**पद्मिनीकान्त** पु० ६त० । १सूर्ये जटाध० । २अर्कवृक्षे च पद्मिनीवल्लभादयोऽप्यत्र । [मा०शा० २४०अ० उदा०।

**पद्मेशय** पु० पद्मे शेते शी—अच् अलुक्स० । विष्णौ हेमच०।

**पद्मोत्तर** पु० पद्मादुत्तरः उत्कृष्टो वर्णेन । कुसुम्भे राजनि०।

**पद्मोत्तरात्मज** पु० जिनचक्रवर्त्तिभेदे हेमच० [देव्यां स्त्री

**पद्मोद्भव** पु० पद्मादुद्भवोऽस्य । कमलयोनौ १ब्रह्मणि २मनसा-

**पद्य** न० पदं चरणमर्हति पद+यत् । कविकृते चतुश्चरणात्मके "पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा" इत्युक्ते १वाक्यभेदे २पदव्यां स्त्री । पद्भ्यां जातः यत् । ४शूद्रे पु० "पद्भ्यां शूद्रो अजायत" यजु०३१।११ पदं विध्यति यत् । ५शर्करायां स्त्री । पदमस्मिन् दृश्यते यत् । ५नातिशुष्के कर्दमे त्रि०कौ०। ६स्तुतौ विश्वः ७पथि स्त्री अमरः ।

**पद्र** पु० पद्यते गच्छत्यत्र पद—आधारे रक् । ग्रामे उज्ज्वल०

**पद्रथ** पु० पद् रथ इव यस्य । पद्गामिनि भाग०३।१८।१२

**पद्व** पु० पद—स्थैर्ये आधारे करणे वा वन् । १भूलोके २रथे च संक्षिप्तसारः ।

**पद्वन्** पु० पद—करणे वनिप् । पथि उज्ज्वलद० ।

**पन** स्तुतौ भ्वा०आत्म०सक०सेट स्वार्थे आय वा तत्र आत्म०। पनायते पनायति आर्द्धधातुके वा आय । अपनायीत् अपनायिष्ट अपनिष्ट । पनायां—बभूव आस चक्रे पेने इत्यादि ।

**पनस** पु० पन्यते स्तूयतेऽसौ वृक्षेषु उत्तमफलत्वात् वृहत्फ